श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

पैत्तांबाडि वराहाचार्यकृतः

# ॥ श्रीदेशिकदण्डकः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीदेशिकदण्डकः ॥

नमः श्रीवेङ्कटेशाय वेङ्कटेशापरात्मने।
कुदृग्धान्तोदयार्थाय सुदृक्सोमाय सूरये॥

सततमवतु वेदचूडागुरुर्वेङ्कटाधीशपादाब्जपूजाविधावर्पिता वेधसा
तत्प्रमोदावहोदारनिध्वानवातूलनिर्धूतसिद्धासुहृत्तूलकालानलाभाविलान्
त्रातुमस्मान् जगद्वीन्द्रमन्येन्द्रकं वा विधातुं स्वतन्त्रे कुलस्यैव
घण्टावतीर्णा यदाकारतस्तं जगद्देशिकं स्तौमि षड्वैरिवैदेशिकम्॥ 1॥

कमलनयनयज्वसूरोरनूनोक्तिबुद्धेरनन्ताख्यसूरेः कुमारं
क्रमात्तत्रयीशास्त्रजालं हयास्याशयाद्
वादिहंसाम्बुवाहादधीतोभयाम्नायचूडार्थमालं
स्फुरद्बालभानुज्ज्वलद्गात्रभास्वत्तटिद्ब्रह्मसूत्रं
क्रमार्चातहस्तीशकारुण्यपात्रं भजे वेङ्कटेशं गुरुं
मानुषं वेङ्कटेशं गुरुम्॥ 2॥

रमणममुमनुप्रविष्टद्वितीयाश्रमस्वाश्रमाचारनिष्ठावसिष्ठं
हयग्रीववासोन्मिषद्धीर्विलासं स्वतः
सम्पतत्ज्ञानवैराग्यशैलीक्षमाभक्तिसिन्धुं प्रपन्नैकबन्धुं
कथाग्रण्यसिद्ध्याद्यशास्त्रोष्मदग्धप्रकाशाप्रकाशत्रयीबाह्यकक्षं
यतीशानहृद्यानवद्यार्थशिक्षं श्रये दण्डकेनाल्पकेनार्भकः॥ 3॥

कृतिनुतपदपद्मरङ्गेशसङ्केतिताम्नायचूडार्यनाम्ना युत !
श्रीकटाक्षोल्लसत्सर्वतन्त्रस्वतन्त्राभिध ! श्रीविभुत्वाद्यभिख्यापक !
श्रीशठार्यादिरामानुजार्यान्तसूरीन्द्रभावैक जाग्रद्रहस्यप्रबन्धैः

अभिन्नातलोकं श्रये त्वां सशोकः कवीड्वादिसिंहं गुरो !
मामजिह्मं विधत्स्व स्वभक्तं सुभक्तं हरौ ॥ 4 ॥

त्रय्यन्तदेशिकीयां विदधत् तद्गरुडकीयां च।
नरपरिपाठीं देशिकदण्डक एष प्रियं करोत्वस्माकम् ॥

विशिष्टभक्तिसिद्ध्यर्थं वराहो वत्सवंशजः।
देशिकोत्तमतुष्ट्यर्थं प्राह देशिकदण्डकम् ॥

॥ इति श्रीदेशिकदण्डकः समाप्तः ॥